॥ अभ्यासपाठः ६ ॥

एतां कथां भूतकाले परिवर्त्य पुनः वदन्तु :

त्यजेदेकं कुलस्यार्थे

सगरः नाम नृपः अस्ति । तस्य पत्नीद्वयम् अस्ति । किन्तु एकः अपि पुत्रः नास्ति । अतः सगरः दुखितः भवति ।

एकदा सः वनं गच्छति । तत्र एकः मुनिः अस्ति । सगरः मुनिवरस्य आश्रमं प्रविशति । मुनिवरं नमस्करोति । आश्रमे एव वासं करोति । श्रद्धया मुनिवरस्य सेवां करोति । एतेन मुनिवरः सन्तुष्तः भवति । सगरः स्वदुःखं वदति । मुनिवरः सर्वं शृनोति । मन्दहासं प्रकटयति । अनन्तरं सगराय वरं ददाति । सगरः सन्तोषेण राजधानीं प्रत्यागच्छति ।

कालः गच्छति । सगरस्य ज्येष्ठपत्नी एकं पुत्रं प्राप्नोति । तस्य नाम असमञ्जः । कनिष्ठपत्नी षष्टिसहस्रं पुत्रान् प्राप्नोति । सर्वे पुत्राः प्रवृद्धाः भवन्ति ।

राजकुमारः असमञ्जः श्रद्धया विद्याभ्यासं न करोति । वृथा नगरे अटति । दुष्टानां सहवासं करोति । स्वयं दुष्टः भवति ।

एकदा सः नदीतीरं गच्छति । तत्र सः एकं बलकं पश्यति । विकटहासं कुर्वन् सः बालकसमीपं गच्छति । बालकं गृह्णाति । जले क्षिपति । बालकः रोदनं करोति । असमञ्जः सन्तोषं प्राप्नोति । एवं सः बाहून् बालकान् जले क्षिपति ।

जनाः एतत् पश्यति । ते अतीव दुःखिताः भवन्ति । सर्वे सम्मिलन्ति । राजसमीपं गच्छन्ति । महाराजं नमस्कुर्वन्ति । असमञ्जस्य दुराचारं वदन्ति । एतत् शृत्वा महाराजः खिन्नः भवति ।

सः सचिवान् आह्वयति । सचिवाः आगच्छन्ति । आसने उपविशन्ति । सगरः पुत्रस्य विषयं वदति । ”इदानीं किं न्यायम्” इति पृच्छति ।

”राज्यात् प्रजापीडकस्य असमञ्जस्य निष्कासनं वरम्” इति सचिवाः वदन्ति । राजा सचिवानां निर्णयम् अङ्गीकरोति । पुत्रम् असमञ्जं राज्यात् निष्कास्यति ।

जनाः महाराजस्य न्यायश्रध्दायाः प्रशम्सां कुर्वन्ति ।

Encoded by Sarada Kalisetty

Please send corrections to sanskrit@cheerful.com
Last updated September 18, 2000